# केन्द्रीयसंस्कृतविश्वविद्यालयः
# एकलव्यपरिसरः
# शिक्षाशास्त्रविभागः

# शिक्षाशास्त्रिद्वितीयवर्षः
# मूल्यशिक्षा (अन्वितिः – 1)

डॉ. बि. वेङ्कट लक्ष्मी नारायणः
सहायकाचार्यः, शिक्षाविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः
एकलव्यपरिसरः, अगरतला

- उपोद्घातः
- प्रकारान्तरेण मूल्यानाम् अर्थाः
- मूल्यानां परिभाषाः
- मूल्यानां प्रकृतिः
- मूल्यानाम् उद्देश्यानि
- मूल्यानां महत्त्वम्
- मूल्यानां स्रोतांसि
- मूल्यानां वर्गीकरणम्

मूल्यम् इति शब्दः **मूल** प्रतिष्ठायामिति धातोः यत् प्रत्यये कृते सति निष्पन्नोयम्। अस्यार्थः मूल्यात् उच्छेदयामः इति। Value इति आङ्ग्लपदस्य समानार्थकः अस्ति। अयं लाटिनभाषायाः Valere इति शब्दात् निष्पन्नः अस्यार्थस्तु To be strong and vigorous संस्कृते तावत् सुदृढत्वम्, तैक्ष्ण्यम् इति।

किं नाम मूल्यमिति चेत् मूल्यं द्विप्रकारकं भवति। वस्त्रादीनां वस्तूनामुत्पादने वा वणिग्भिः विनियुक्तं द्रव्यं मूलमिति। विक्रयणेन प्राप्तमतिरिक्तद्रव्यं लाभाख्यं मूल्यमिति कथ्यते। किन्तु लोके मूलस्य, लाभस्य च संयोजनेन वस्तुनः मूल्यं निर्णीयते। व्यवहारोऽयं निरूढलक्षणया निरुह्यते। मनुष्यस्य ऐहिकं मूल्यं भवति। यस्मिन् समाजे येषाम् आदर्शानां महत्त्वं भवति, यैः सामाजिकैः जनानां व्यवहारः निर्दिष्टः नियन्त्रितश्च भवति। ते आदर्शाः तस्य समाजस्य मूल्यवर्धने प्रेरकाः भवन्ति।

# प्रकारान्तरेण मूल्यानामर्थाः

- **दार्शनिकार्थः** – मूल्यं केनापि वस्तुना विचारेण दृष्टिकोणेन वा सम्बन्धितं भवति। अतः यद्वस्तु कस्यचित् व्यक्तेः उपयोगाय भवति तद् तस्य कृते मूल्यवत् इति।
- म**नोवैज्ञानिकदृष्टिकोणः** – मानवजीवनप्रणाल्यां विद्यमानानाम् अन्धविश्वास्य दूरीकरणं, वस्तुनिष्ठमनोवैज्ञानिकविचाराणां विकासः, सर्जनात्मकचिन्तनं, सत्यान्वेषणानुरागः इत्यादीनाम् आकाङ्क्षाः पूरयति तद् मूल्यमिति।
- **जैविकार्थः** (Biological Meaning) - मूल्यं तद्वस्तुनः क्रियायाः वा विशेषणं भवति। यद् अस्माकं जीवनस्य सुरक्षाम् एवं वृद्धौ च सहायकं भवति।
- **नैतिकार्थः** (Moral Meaning) - तानि वस्तूनि अथवा क्रियाः मूल्ययुक्ताः सन्ति। यानि अस्माकम् आत्मनः पूर्णताप्रदाने सहायकानि भवन्ति।

# प्रकारान्तरेण मूल्यानामर्थाः

❖**दार्शनिकोऽर्थः -** मूल्यानि केनापि वस्तुना व्यक्तिनां सम्बद्धानि न भवन्ति। अपितु केनापि विचारेण दृष्टिकोणेन वा सम्बद्धानि भवन्ति। अतः यद् वस्तु यस्य मनुष्यस्य कृते उपयोगी भवति तदेव तस्य कृते मूल्यवत् भवति।

❖**मनोवैज्ञानिकोऽर्थः -** येन अस्माकम् इच्छापूर्तिः जायेत तत् मूल्यमिति।

❖**जैविकोऽर्थः -** मूल्यं तस्य क्रियायाः द्रव्यस्य वा विशेषतास्ति, या अस्माकं जीवनस्य सुरक्षायां वृद्धौ च सहायिका भवति।

❖**नैतिकोऽर्थः -** तानि वस्तूनि अथवा क्रियाः मूल्ययुक्ताः सन्ति। यानि अस्माकम् आत्मनः पूर्णताप्रदाने सहायकानि भवन्ति।

## ❖ मूल्यानां परिभाषाः -

1. सत्यं शिवं सुन्दरम् इति भावनांम् उपलब्धुं यत् सहायकं भवति तद् मूल्यम्।

   - महात्मा गान्धिः

2. मूल्यमित्युक्ते ते नियमाः बुध्यन्ते ये खलु अस्माकं कार्यगतिविधिनां दिक्दर्शकाः भवन्ति। - एस्.बि.चावनसमितिः

3. मूल्यं नाम यो यदिच्छति तद्वस्तुनः अंशस्य वा विषये तदीयवैयक्तिकाभिप्रायप्रकटनं भवति। तथा च इतरैः कीदृशम् अभिलष्यते? इत्याधारेणापि मूल्यं निर्धारितं भवति। कदाचिद् किं वाञ्छतीति सर्वदा अत्यावश्यकं न भवति इति। - **लिङ्जी**

4. मनुष्यस्य रुचेः सापेक्षिकं महत्त्वम् अथवा व्यक्तित्वस्य बलवती इच्छा मूल्यमिति। - **आलपोर्ट**

## ❖ मूल्यानां परिभाषाः -

4. मूल्यानि सर्वदा मनसा सम्बद्धानि सन्ति। मूल्यानां सम्बन्धः सदा अनुभवेन सह भवति। **- डी.एच्.पार्कर**

5. मूल्यानि समाजेन स्वीकृताः प्रेरणाः लक्ष्यानि च सन्ति। यदनुकूलशिक्षणस्य सामाजिकीकरणस्य च प्रक्रियाद्वारा व्यक्तेः अन्तर्निहितस्य तस्य प्राथमिकतानाम् आकांक्षाणां च रूपं धारयन्ति।

**- राधा कमल मुखर्जिवर्यः**

6. मूल्यप्रदानं नाम प्राधान्येन प्रशंसनम्, प्रतिष्ठाप्रदानम्, समीक्षणम्, तारतम्यकथनञ्च भवति। मूल्यप्रदाने तत्तत् वस्तुनः विषयस्य वा विषये स्वीयाभिलाषाप्रकटनं, प्रियतमवस्तुरूपेण परिग्रहणम्, इतरवस्तुभिस्सह तुलनायां तदीयप्रकृतेः मूल्यस्य च विषये स्वीयनिर्णयप्रदानम् अन्तर्गतं भवतीति **- जॉन् डीवीवर्यः**

7. यो मूल्यं प्रददाति तस्य तद्वस्तुनः मध्ये वर्तमानः परस्परसम्बन्ध एव मूल्यमिति। **- बार्टर पैरी**

- **दर्शनशास्त्रानुसारम्** – मनुष्यस्य जीवनं प्रति दृष्टिकोणमेव मूल्यमित्यभिधीयते। वेदमूलकदर्शनेषु मानवजीवनस्य चरमलक्ष्यभूतः मोक्षः भवति। चार्वादिदर्शनानाम् अनुसारं भौतिकानि सुखानि एव परमं लक्ष्यं भवति। भारतीयदार्शनिकानां सम्मतौ मोक्षः, भोगश्च द्विविधे मूल्ये स्तः। अत एव मोक्षार्थिनां कृते मूल्यं परमार्थकेन्द्रितं भवति, भोगार्थिनां कृते स्वार्थकेन्द्रितं मूल्यं भवतीति।
- **धर्मशास्त्रानुसारम्** – नैतिकनियमाः एव मूल्यमिति प्रतिपाद्यते। प्रत्येकं धर्मस्य केचन नैतिकनियमाः भवन्ति। ते नियमाः एव मनुष्यस्य व्यवहारं नियन्त्रयन्ति निर्देशयन्ति च।

कस्यापि समाजस्य एतानि मूल्यानि विश्वस-आदर्श-सिद्धान्त-नैतिकनियम-व्यवहार-मानदण्डाश्च वर्तन्ते, येभ्यः समाजिकमहत्त्वं प्रतिष्ठितं भवति, यैश्च तेषां व्यवहारः निर्देशितः नियन्त्रितः च भवति, एतदेव तस्य समाजस्य तद्-व्यक्तीनां च कृते मूल्यानि भवन्ति।

# मूल्यानां प्रकृतिः

1. मूल्यानि भावनायाः उपरि आधारिताः भवन्ति।
   - न काष्ठे विद्यते देवो न पाषाणे न मृण्मये ।
     भावे हि विद्यते देवो तस्मात् भावो हि कारणम् ॥
   - मन्त्रे तीर्थे द्विजे दैवे दैवज्ञे भेषजे गुरौ ।
     यादृशी भावना यत्र सिद्धिर्भवति तादृशी ॥
2. वृत्तं मूल्यस्य कारणम् ।
   - न जातिर्न कुलं तात! न स्वाध्यायः श्रुतं न च ।
     कारणानि द्विजत्वस्य वृत्तमेव अस्य कारणम्।।
3. देशकालपरिस्थित्यनुसारं मूल्यानि आधारितानि भवन्ति।
   - यस्मिन् देशे य आचारः न्यायदृष्ट्या तु कल्पितः।
     स तस्मिन् कर्तव्यः देशाचारः स्मृतौ भृगोः।।

# मूल्यानां प्रकृतिः

4. मानवजीवनस्य उत्कर्षापादकः श्रेष्ठत्वापादकः धर्मविशेषः मूल्यं भवति।

- आहार निद्रा भय मैथुनं च सामान्यमेतत् पशुभिर्नराणाम् ।
  धर्मो हि तेषामधिको विशेष: धर्मेण हीनाः पशुभिः समानाः ॥

5. धर्माधर्म-कर्तव्याकर्तव्य-सदसद्विवेकवर्धनात्मिका बुद्धिरेव मूल्यं भवति।

- यस्य नास्ति विवेकस्तु केवलं यो बहुश्रुतः ।
  न स जानाति शास्त्रार्थान् दर्वी पाकरसानिव ॥

6. श्रेष्ठाचरणं मूल्यं भवति।

- यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
  स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥

## प्रकृतिः

- मूल्यं मानवजीवनस्य लक्ष्येषु सम्बद्धः वर्तते।
- अस्माकम् आचारणं मूल्येन प्रेरितः वर्तते।
- मूल्यमस्माकं भावनानां, रुचीनां, विचाराराणाञ्च प्रतिनिधित्वं करोति। एवं यत् समीचीनम्, न्यायोचितं, वाञ्छितञ्च कार्यं कर्तुं निर्दिशति।
- कस्यचिद् वस्तुनः पोषणात्मिका क्रिया। यः जनः धर्मः मूल्यमिति चिन्तयति सः तं रक्षितुं महद्प्रयासं करोति।

## प्रकृतिः

- वैयक्तिकतत्त्वस्य अवैयक्तिकतत्त्वस्य च अन्तः क्रियायाः सहयोगात्मकः परिणामः मूल्यमिति।
- मूल्यस्य स्वकीयमहत्त्वं किमिति चेद् एकः उत्तमः जनः एव उत्तमं वस्तु द्रष्टुं ज्ञातुं वा प्रभवतीति।
- मूल्यानां निर्माणं संरक्षणं च मनुष्यस्य महत्त्वपूर्णं प्रयोजनं वर्तते।
- आत्मानुभूतिः, सन्तुष्टिः, विकासः, सत्यनिष्ठादीनां पूर्णता प्राप्तिरेव मूल्यानां लक्ष्यं भवति।

# मूल्यानां प्रकृतिः

1. मूल्यं मानवजीवनस्य लक्ष्येषु सम्बद्धः वर्तते।
2. अस्माकम् आचारणं मूल्येन प्रेरितः वर्तते।
3. मूल्यमस्माकं भावनानां, रुचीनां, विचाराणाञ्च प्रतिनिधित्वं करोति। एवं यत् समीचीनम्, न्यायोचितं, वाञ्छितञ्च कार्यं कर्तुं निर्दिशति।
4. कस्यचिद् वस्तुनः पोषणात्मिका क्रिया। यः जनः धर्मः मूल्यमिति चिन्तयति सः तं रक्षितुं महद्प्रयासं करोति।
5. वैयक्तिकतत्त्वस्य अवैयक्तिकतत्त्वस्य च अन्तः क्रियायाः सहयोगात्मकः परिणामः मूल्यमिति।
6. मूल्यस्य स्वकीयमहत्त्वं किमिति चेद् एकः उत्तमः जनः एव उत्तमं वस्तु द्रष्टुं ज्ञातुं वा प्रभवतीति।
7. मूल्यानां निर्माणं संरक्षणं च मनुष्यस्य महत्त्वपूर्णं प्रयोजनं वर्तते।
8. आत्मानुभूतिः, सन्तुष्टिः, विकासः, सत्यनिष्ठादीनां पूर्णता प्राप्तिरेव मूल्यानां लक्ष्यं भवति।

# मूल्यानाम् उद्देश्यानि

समाजाय व्यवहारकुशलनागरिकनिर्माणम्।

कष्टपरिस्थितौ समुचितनिर्णयस्वीकरणे दक्षतोत्पादनम्।

वैयक्तिक-सामूहिकतया शान्तिप्राप्तिः।

प्रत्येकस्तरे चरित्रनिर्माणम्।

सामाजिकेषु नैतिक-आर्थिक-सामाजिक-सांस्कृतिक-राजनैतिक-शैक्षिक-शारीरिक-मनोवैज्ञानिक-मूल्यानां विकासः।

# मूल्यानाम् उद्देश्यानि

लक्ष्यसिद्धान्तानाम् अनुत्साहितानाञ्च कृते उत्साहप्रदानम्।

परस्परसहयोगभावनायाः विकाससम्पादनम्।

प्रतिकूलवातावरणं स्वानुकूलीकर्तुं प्रेरणाप्रदानम्।

बुद्धेः विवर्धनम्, तार्किकक्षमतायाः विकासः।

धर्मनिरपेक्षभावनायाः कृते समर्थनम्।

राष्ट्रियान्ताराष्ट्रियैकता-प्रेम-बन्धुत्वभावनानां विकासः।

अप्राप्तकौशलानि प्राप्तुं मार्गप्रदानम्।

# मूल्यानाम् उद्देश्यानि

1. समाजाय व्यवहारकुशलनागरिकनिर्माणम्।
2. वैयक्तिक-सामूहिकतया शान्तिप्राप्तिः।
3. प्रत्येकस्तरे चरित्रनिर्माणम्।
4. सामाजिकेषु नैतिक-आर्थिक-सामाजिक-सांस्कृतिक-राजनैतिक-शैक्षिक-शारीरिक-मनोवैज्ञानिक-मूल्यानां विकासः।
5. कष्टपरिस्थितौ समुचितनिर्णयस्वीकरणे दक्षतोत्पादनम्।
6. लक्ष्यसिद्धान्तानाम् अनुत्साहितानाञ्च कृते उत्साहप्रदानम्।

# मूल्यानाम् उद्देश्यानि

7. परस्परसहयोगभावनायाः विकाससम्पादनम्।
8. प्रतिकूलवातावरणं स्वानुकूलीकर्तुं प्रेरणाप्रदानम्।
9. बुद्धेः विवर्धनम्, तार्किकक्षमतायाः विकासः।
10. अप्राप्तकौशलानि प्राप्तुं मार्गप्रदानम्।
11. धर्मनिरपेक्षभावनायाः कृते समर्थनम्।
12. राष्ट्रियान्ताराष्ट्रियैकता-प्रेम-बन्धुत्वभावनानां विकासः।

# मूल्यानां महत्त्वम्

संस्कृतवाङ्मये मूल्यानि (values) निर्मलगुणाः इति, आत्मगुणाः इति, सहजगुणाः इत्यादिभिः शब्दैः सूचितानि वर्तन्ते।

# निर्मलगुणः

वाञ्छा सज्जनसंगतौ परगुणे प्रीतिर्गुरौ नम्रता

विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयम् ।

भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खलै-

रेते येषु वसन्ति निर्मलगुणास्तेभ्यो महद्भ्यो नमः ॥

# आत्मगुणः

दया सर्वभूतेषु शान्तिरनसूया शौचमनायासो माङ्गल्यमकार्पण्यमस्पृहेति अष्टौ आत्मगुणाः ।

# सहजगुणः

दानत्वं प्रियवक्तृत्वं धीरत्वमुचितज्ञता ।

अभ्यासेन न लभ्यन्ते चत्वारः सहजाः गुणाः ॥

एवं सामान्य प्रयोजनानि आरभ्य परमपुरुषार्थ-मोक्षप्राप्तिपर्यन्तं मूल्यानां महत्त्वं मानवजीवे द्रष्टुं शक्यते ।

# मूल्यानां महत्त्वम्

- मूल्यानि अन्त्यन्तमहत्वपूर्णानि भवन्ति यतः तानि अस्माकं मानसिकविकासाय एवम् अभिवृद्ध्यै च सहायकानि भवन्ति।
- अस्माकं नित्यजिवनव्यवहारं नियन्त्रयितुम् एतानि सिद्धान्तरूपेण भवन्ति। न केवलम् अस्माकं व्यवहारस्य अपि तु अस्माकम् आदर्शानां लक्ष्यानां च दिशानिर्देशं कुर्वन्ति।
- नैतिकावश्यकतां सामाजिकक्रियायाः अन्तिमलक्ष्याणाम् उद्देश्यानां च अभिव्यक्तीकरणं कुर्वन्ति मूल्यानि।

# मूल्यानां महत्त्वम्

- जीवने अस्मभ्यं कि महत्त्वपूर्णं भवतीति प्रतिदर्शयन्ति मूल्यानि। यानि अस्माकं व्यक्तिगतमार्गदर्शकसिद्धान्तानां जीवनलक्ष्यानां रूपेण वा सूचितानि भवन्ति।
- मूल्यानि महत्त्वपूर्णानि भवन्ति यतः तानि अस्माकं विश्वासस्य दृष्टिकोणस्य व्यवहारस्य च मार्गनिर्देशनं कुर्वन्ति।

# मूल्यानां स्रोतांसि


मूल्यानां स्रोतांसि मूल्यस्रोतांसि। द्विविधं भवति व्यक्तिनिष्ठं, व्यक्तिसम्बद्धवस्तुनिष्ठञ्च। किं वा मानवजीवने मूल्यानां लाभाः सन्ति? इति विचारिते सति इदं वक्तुं शक्यते यत् शिशोः आरभ्य मृत्युपर्यन्तं द्विविधं मूल्यं पोषयति संरक्षयति च जनान्। यथा - आहार-गृह-वस्त्र-चिन्तन-प्रयोग-अभ्यासादीनि मूल्यानि। एतेषां मूल्यानाम् आवश्यकता अतीव दरीदृश्यते जनेषु। किन्तु प्राप्तिः कथम्? इति प्रश्ने कृते सति स्रोतानाम् अन्वेषणं क्रीयते। तदधारीकृत्यैव कतिचन स्रोतांसयः संचिताः सन्ति।


# SOURCES OF VALUES

Values of people have their roots in numerous aspects of contemporary society. In particular, there are 4 sources of value formation in any society. These are: -

1. Social Institutions
2. Organisational Values
3. Peers & Colleagues
4. Work & Career

# Other many sources of Values.




स्रोतांसि
संविधानम्
आध्यात्मिकता
इतिहासः
परिवारः
संस्कृतिः
समाजिकसंरचना/ संस्कारः
धर्मः
वंशपरम्परा
विज्ञानम्
वाङ्मयम्/साहित्यम्
दर्शनम्

# मूल्यानां स्रोतांसि

- इतिहासः
  - प्राचीनेतिहासः
  - मध्यकालिनेतिहासः
  - आधुनिकेतिहासः

# इतिहासात् किं शिक्षणीयम्?

एतद्देशप्रसूतस्य सकाशात् अग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवः।।

उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।
वर्षं तत् भारतं नां भारती यत्र संततिः।।

लोकसंग्रहसंयुक्तं विधात्रा विहितं पुरा।
**सूक्ष्मधर्मार्थनियतं सतां चरितमुत्तमम्।।**

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥

# इतिहासात् किम् अभ्युपेयम्?

इतिहासः ऐतिह्यं सूचयति। पूर्वकालिकीं परिस्थितीं परिज्ञापयति। परिस्थितेः अनुसारं कथं वर्तितव्यमिति सूचयति। किमुपादेयम्? किमनुपादेयमिति च निर्दिशति।

- रामादिवत् प्रवर्तितव्यं न तु रावणादिवदिति।
- पुराणानि भगवद्भक्तेः आवश्यकतां सूचयन्ति। पुराणपुरुषाणां वृत्तान्तादिना पावित्र्यं सम्पादनीयमिति सूचयन्ति।
- धर्मः एव आश्रयणीयः न अधर्मः इति महाभारतं सूचयति।
- पञ्चतन्त्र-हितोपदेश-चाणक्यनीत्यादयः नीतेः प्राधान्यं सूचयन्ति।


# संस्कृतिः

मानवजीवनस्य उत्कर्षपादकः धर्मविशेषः संस्कृतिः भवति। तद्यथा -

भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा ।

तत्तत् समाजे निवसतां जनानां समग्रजीवनविधानस्य प्रवृत्तीनां मूल्यानाञ्च सम्मिश्रितं रूपं संस्कृतिः इति।

एवं तत्तत् समाजे निवसन्तः जनाः तदीयां संस्कृतिम् अनुभूय तां संस्कृतिम् आगामिसन्ततेः कृते परम्परारूपेण संक्रामयन्ति।


संस्कृतिः
भौतिकी
भावात्मिका

# भारतीयसंस्कृतेः वैशिष्ट्यानि

- आश्रमधर्मः
- पुरुषार्थाः
- कर्मसिद्धान्ते विश्वासः
- आध्यात्मिकता
- भक्तिभावना
- विश्वशान्तिः
- सर्वभूतहितत्वम्
- त्यागनिरतिः

- सत्यनिष्ठता
- अतिथिसेवा
- क्षमा
- विरागित्वम्
- सार्वजनीनभावना
- शिक्षासम्बद्धा संस्कृतिः
- सामाजिकसंस्कृतिः
- आर्षसंस्कृत्यादयः

# धर्मः/ धार्मिकसंस्थाः

- धृञ्-धारणपोषणयोः इत्यस्माद्धातोः निष्पन्नोऽयं धर्मशब्दः ।
- धारणाद्धर्ममित्याहुः धर्मो धारयते प्रजाः ।
  यत्स्याद्धारणसंयुक्तं स धर्म इति निश्चयः ॥
- धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
  धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥

➢ आप्रा रजांसि दिव्यानि पार्थिवा श्लोकं देवः कृणुते स्वाय धर्मणे ॥३ ॥ (ऋग्वेद - 4.5.3.)

➢स नैव व्यभवत् तच्छ्रेयो रूपमत्यसृजत धर्मं तदेतत्क्षत्रस्य क्षत्रं यद्धर्मः तस्माद्धर्मात् परं नास्त्यथो अबलीयान् बलीयाँसमाशँसते धर्मेण यथा राज्ञैवं यो वै स धर्मः सत्यं वै तत् तस्मात्सत्यं वदन्तमाहुर्धर्मं वदतीति धर्मं वा वदन्तं सत्यं वदतीत्त्येतद् ह्येवैतदुभयं भवति ॥ (बृ.उ. – 1.4.14)

- श्रूयतां धर्म सर्वस्वं श्रुत्वा चैव अनुवर्त्यताम् ।
  आत्मनः प्रतिकूलानि, परेषां न समाचरेत् ॥
  (विष्णुधर्मोत्तरपुराणम् – 3.255.44)
- धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः ।
  तस्माद्धर्मो न हन्तव्यो मा नो धर्मो हतोऽवधीत् ॥
  (मनुस्मृतिः – 8.15)
- चोदना लक्षणोऽर्थो धर्मः । (पू० मी० १।१।२)
- यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः । (वैशे० १।१।२)

भारतदेशे सनातनधर्मः प्रसिद्धः आसीत्। स एव इदानीं हिन्दूधर्मत्वेन लोके प्रचारे विद्यते। सनातनधर्मात् विभेदीकृत्य जैन-बौद्ध-सिक्कादिधर्माः भारते प्रचारे समागताः। तथैव क्रैस्तव-महम्मदीयादिधर्माः अपि भारते सन्दृश्यमानाः वर्तन्ते आधुनिके काले।

दया, अहिंसा, सत्यं, दानं शीलत्वं, परोपकारित्वम् इत्यादिषु समानदृष्टिः वर्तते सर्वेषामपि धर्माणाम्।

सर्वमतसहनं, भ्रातृत्वभावना, सार्वजनीनभावना, वसुधैककुटुम्बकत्वभावना, विश्वशान्तिः, विश्वश्रेयश्च सर्वेषां धर्माणां प्रधानानि उद्देश्यानि।

# दर्शनम्

- दर्शनस्य कृते आङ्ग्लभाषायां Philosophy इति अस्यार्थः तत्त्वज्ञानमिति। निरन्तरसत्यान्वेषणं दर्शनमित्यर्थः।
- वेदप्रामाण्यावलम्बकानि आस्तिकदर्शनानीति।
- अनवलम्बकानि नास्तिकानीति भारते सुप्रसिद्धानि।
- सर्वेषामपि दर्शनानां प्रधानं लक्ष्यं सत्यान्वेषमेव।
- सर्वाण्यपि दर्शनानि स्वीयसिद्धान्तान् सामान्यजनेषु प्रबोधनाय उद्भुतानि वर्तन्ते।

एतेषामध्ययनेन वयं मूल्यानि प्राप्तुं शक्नुमः।

# वाङ्मयम्/साहित्यम्

वाङ्मयं तत्तत् देशस्य समग्रपरिस्थितं सूचयति। जनानां जीवनविधानं आचार-व्यवहारादिकं सूचयति। तत्तत् देशस्य वैशिष्ट्यं ज्ञातुं साहित्यं मार्गदर्शकं ज्ञानप्रबोधनात्मकं च भवति। अतः वाङ्मयस्य/साहित्यस्य आधारेण वंय मूल्यानि ज्ञातुं शक्नुमः। यथा –

संसारविषवृक्षस्य द्वे एव मधुरे फले।
काव्यामृतरसस्वादः सङ्गमः सज्जनैः सह॥

# विज्ञानम्

कस्यापि अंशस्य वैज्ञानिकसम्मतत्त्वम् अपेक्षितं चेत् वस्तुनिष्ठत्वं परीक्षत्वं मापनत्वं परिशीलनार्हत्वं च अपेक्ष्यते। एतत् चतुर्गुणसहितमेव विज्ञानं भवति।

वर्तमानयुगः वैज्ञानिकप्राविधिकयुगः वर्तते। कस्यचित् देशस्य विकासः वैज्ञानिकप्राविधिकावलम्बनं विना न सम्भाव्यते। तत्तत् देशेषु दृश्यमाना सम्पन्नता एतत्क्षेत्रप्रभावेनैव सम्पादिता दृश्यते।

जनानां संकीर्णभावनाः वैज्ञानिकभावनया एव दूरीकर्तुं शक्यन्ते। अनेनैव सामान्यजनानां प्रवृत्तयः आलोचनाविधानं प्रवर्तनादिकं च परिवर्तयितुं शक्यते।

# सामाजिकसंरचना/संस्काराः

समाजः यान् गुणान् अथवा मूल्यानि आचरति, परिपोषयति ते समाजसम्बद्धाः सामाजिकसंरचनाः च भवन्ति। तत्र विशेषतया वर्णाश्रमव्यवस्था समाजस्य आधार भवति। आश्रमधर्माः, पुरुषार्थचतुष्टयसाधनम्, सर्वभूतहितत्वम्, त्यागभावना, सत्यनिष्ठता इत्यादीनि मूल्यानि अत्र ग्रहीतुं शक्यानि।

शैशवेभ्यस्तविद्यानां यौवने विषयैषिणाम्।
वार्धक्ये मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्।

सर्वभूतहितत्वं विश्वशान्तिश्च समाजस्य मुख्योद्देश्यं भवति। तथैव सामाजिकाचाराः, समानता, समानावकाशप्रकल्पनम्, जनतन्त्रात्मकव्यवस्थायाः सुदृढत्वसम्पादम्, योग्यनागरिकानां निर्माणम्, सर्वभूतहितत्वम्, भ्रातृत्वभावना, सामाजिककुरीतीनां निर्मूलनम् इत्यादयः।

# मूल्यानां वर्गीकरणम्
## (Classification of Value)

मनोवैज्ञानिकरीत्या उच्यते यत् प्रेरणा एवं प्रतिस्पन्दनं प्रत्येकस्मिन् जीवे जायते। अथ च यथा प्रेरणा प्रतिस्पन्दनं भवति। मनः, बुद्धिः, हृदयञ्च अन्येभ्यः इन्द्रियेभ्यः स्वीकृतेभ्यः आन्तरिकं बाहिकं वा मूल्यानां प्रदर्शनं कर्तुं क्रमनिर्धारणं कुर्वन्ति एते, व्यवस्थितः क्रमः एव मानवानां जीवानां वा व्यक्तित्वम् उत प्रतिकूलपरिस्थितौ आनुकूलयति। तेषां तत्त्वानां मूल्यानां वर्गीकरणं स्पष्टता बहुधा विहिता । तत्र प्रमुखाणामेव प्रदर्श्यते। तद्यथा –

**वी.एन्. के. रेड्डी महोदयः स्वीय पुस्तके** Man Education and Values इत्यस्मिन् मूल्यानां वर्गीकरणम् एवमकरोत् -

1. भौतिकमूल्यम् 2. आर्थिकमूल्यम् 3. मनोवैज्ञानिकमूल्यम्

**शेवर तथा स्ट्रांग महोदयौ वर्गत्रये मूल्यं कृतवन्तौ ।**

- नैतिकमूल्यम् (Moral Value)
- सौन्दर्यात्मकं मूल्यम् (Aesthetical value)
- साहायकं मूल्यम् (Secondary Value)

**प्लेटोमहोदयानुसारम्** - अन्तिमसत्यम् इत्यस्याधारेण मूल्यस्य वर्गीकरणं त्रिविधं भवति ।

1. सत्यम् 2. सौन्दर्यम् 3. साधुत्वम्

# मूल्यानां वर्गीकरणम्/प्रकाराः

- नैतिकमूल्यानि
- आध्यात्मिकमूल्यानि
- सामाजिकमूल्यानि
- शैक्षिकमूल्यानि
- राष्ट्रियमूल्यानि
- अन्ताराष्ट्रीयमूल्यानि

# नैतिकमूल्यानि

मानवीयव्यवहारस्य कृते नैतिकमूल्यानि मार्गदर्शकानि भवन्ति। नैतिकमूल्यैः विना मानवीयव्यवहारः अनैतिकः अमानुषः क्रूरश्च भविष्यति। नैतिकप्रवर्तनम्, सदाचारः, विधेयतायाः प्रदर्शनम्, सहिष्णुता, सत्यवाक्परिपालनम्, न्यायाचरणम् इत्यादीनि नैतिकमूल्यानि भवन्ति। अतिप्राचीनकालादारभ्य अद्यावधि समाजे एतादृशानां नैतिमूल्यानां कृते महत्त्वपूर्णं स्थानं प्रदत्तम् अस्ति।

# आध्यात्मिकमूल्यानि

मानवजीवनस्य उत्तमत्वसूचकानि आध्यात्मिमूल्यानि भवन्तीति कथने अतिशयोक्तिर्नास्ति। वस्तुतः मानवजीवनस्य उत्तमत्वम् आध्यात्मिकमूल्यकारणैः एव लब्धं वर्तते। इन्द्रियनिर्ग्रहः, तपस्चर्या, अहिंसाप्रवृत्तिः, निष्कामकर्मभावना, त्यागः, सन्यासित्वम्, सत्ये प्रतिष्ठितम् इत्यादीनि आध्यात्मिकमूल्यानि भवन्ति। आध्यात्मिकमूल्यानि 'आत्मशान्त्यर्थम्' अवश्यम् अभिवर्धनीयानि भवन्ति। उक्तञ्च श्रीमद्भगवद्गीतायाम् -

श्रेयान् द्रव्यमयाद् यज्ञात् ज्ञानयज्ञः परन्तप।
श्रेयोऽपि ज्ञानामभ्यासात् ज्ञानाद् ध्यानं विशिष्यते।
ध्यानात् कर्मफलत्यागः त्यागाच्छान्तिरनन्तरम्॥

एवम् आध्यात्मिकमूल्यैर्विना मानवः आध्यात्मिकदृष्ट्या पतितः इति परिगण्यते।

# सामाजिकमूल्यानि

समाजस्य अभ्युदयाय सामाजिकसंस्करणाय च सामाजिकमूल्यानि आवश्यकानि भवन्ति। समानता, समानावकासप्रकल्पनम्, सामाजिकुनीतीनां निर्मूलनम्, सङ्घसंस्करणम्, सार्वजनीनत्वभावनायाः संवर्धनम् इत्यादीनि सामाजिकमूल्यानि भवन्ति। सामाजिकमूल्यैः विना समाजस्य विकासः न कदापि सम्भाव्यते।

# शैक्षिकमूल्यानि

शिक्षाक्षेत्रे प्रमाणत्ववर्धनाय गुणवत्ततायाः संवर्धनाय च शैक्षिकमूल्यानि अत्यावश्यकानि भवन्ति। छात्राणां सार्वाङ्गिकाभिवृद्धेः सम्पादनम्, सम्पूर्णसाक्षरतायाः सम्पादनम्, योग्यनागरिकनिर्माणम्, आदर्शसामाजिकनिर्माणम्, नागरिकेषु दक्षतायाः अभिवर्धनम्, महापुरुषाणां जीवितादर्शाः इत्यादीनि शैक्षिकमूल्यानि भवन्ति। एतादृशशैक्षिकमूल्यानां परिगणनं विना केवलं पाठ्यक्रमस्य कृते एव प्राधान्यं प्रदीयते चेत् शिक्षायाः लक्ष्यं कदापि साधितं न भविष्यति। शैक्षिकमूल्यैः विना क्रियमानं बोधनं निष्प्रयोजनं भविष्यति।